अव्यापन्नाः प्रसवेन रक्तमित्यभिधीयते ॥ रसादेव स्त्रिया रक्तं रजःसंज्ञं प्रवर्त्तते । तद्वर्षाद्द्वादशादूर्द्ध्वं याति पञ्चाशतः क्षयम् ॥ आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य पाञ्चभौतिकञ्चापरे जीवरक्तमाङ्गराचार्य्याः ॥ "विस्रता द्रवता रागः स्पन्दनं लघुता तथा । भूम्यादीनां गुणा ह्येते दृश्यन्ते चात्र शोणिते" । [याम् ।

**अस्रपाटी** स्त्री अस्रजः पाटी परिपाटी ६त० । शोणितधारा-

**असेचनक** त्रि० न सिच्यते तृप्यति मनोऽत्र सिच—ल्युट् संज्ञायां कन् । १अत्यन्तप्रियदर्शने यद्दर्शनान्मनो न तृप्यति तत्र "नयनयुगासेचनकम् मानसवृत्त्यापि दुष्प्रापम्" सा०द० । सेचनं सेकः अभावे न०त० स्वार्थे कन् । २सेचनाभावे न०ब० । ३सेचनशून्ये त्रि० ।

**असेवन** न० अभावे न०त० । १सेवाभावे न०ब० । २सेवाशून्ये

**असौ** अव्य० सो-बा०-डौ न०त० । अदःशब्दार्थे । "असौनामाऽयमिदं रूप इति" शत०ब्रा० । अयञ्च साक्षादादिः इति बहवः । असौकृत्य । गणरत्ने तु तत्र गणे अग्नौ इति पठितम् व्याख्यातञ्च अग्नौ इति तीक्ष्णत्वे अग्नौकृत्येति" इति । [२सौन्दर्य्यशून्ये त्रि० ।

**असौन्दर्य्य** न० अभावे न०त० । १सौन्दर्य्याभावे न०ब० ।

**असौम्य** त्रि० विरोधे न०त० । सौम्यत्वविरोधिघोरत्वयुक्ते

**असौम्यस्वर** त्रि० असौम्यः स्वरोयस्य । १काकतुल्यमन्दस्वरयुक्ते । २कठोरस्वरे च । [ २सौष्ठवशून्ये त्रि० ।

**असौष्ठव** न० अभावे न०त० । १सौष्ठवाभावे न०ब० ।

**अस्कन्न** त्रि० स्कन्द—क्त न०त० । अक्षरिते । "स्कन्नं हविरसादिति" शत०ब्रा० ।

**अस्कम्भन** त्रि० स्कम्भ—ल्युट् न०त० । १रोधनाभावे न०ब० । २रोधनशून्ये । "अस्कम्भने सविताद्यामदृंहत्" ।१०,१४९,१

**अस्कृधोयु** त्रि० कृधः ह्रस्वः निरु० न०त० ६त० साधु । १अविच्छिन्ने २अह्रस्वे च । "अस्मे धत्त यदसदस्कृधोयु" ऋ० ७,५३,३ । "युवोर्मित्रावरुणावस्कृधोयु" ऋ० ६,६७, ११ । अस्कृधोयुरजरः ६,२२,३ । "अस्कृधोयुरविच्छिन्नः" भा० ।

**अस्खलित** त्रि० न०त० । १अप्रच्युते स्वकर्त्तव्ये २अप्रमत्ते च "भूभङ्गिरप्यस्खलिता स्खलद्भिः" माघः । "स मे चिरायास्खलितोपचाराम्" रघुः ।

**अस्त** पु० अस्यन्ते सूर्य्यकिरणा यत्र आधारे क्त । १पश्चिमाचले, "अधिरोढुमस्तगिरिमभ्यपतत्" माघः । "विडम्बयत्यस्तनिमग्नसूर्य्यम्" रघुः । कर्मणि क्त २क्षिप्ते ३अवसिते च त्रि० "निरस्तः परास्तः" भवद्वेः । "गतिरपास्तसंस्था मतिः" मालती० । "निरस्तगाम्भीर्यमपास्तधैर्यम्" माघः । भावे क्त । ४दर्शनायोग्यत्वे ५अवसाने न० । आधारे क्त । ज्योतिषोक्ते ६लग्नात् सप्तमे स्थाने न० । लग्नात् सप्तमस्थानस्य तथात्वञ्च तस्योदये लग्नस्यादर्शनहेतुत्वात् । तथा हि द्वादशराशिचक्रात्मकस्य प्रवहवायुना निशं पश्चान्नीयमानस्य भचक्रस्य मध्ये दिवा षट् राशयो रात्रौ च षट् क्रमेणोद्गच्छन्ति तत्रोदितलग्नानां च षण्णामेव दर्शनयोग्यता इतरेषां षण्णां तु भूमण्डलेनाच्छादनान्न दृश्यता । तत्र यस्य यस्य राशेरुदयः यस्मिन् समये जायते ततः सप्तमराशेरुदयसमये तस्य तस्यास्तत्वम् अदर्शनयोग्यत्वं भवतीति सप्तमराशेरुदयकालस्यास्तकारित्वम् । "जन्मलग्नात् सुखास्तान्यरिपुरन्ध्रेष्वशोभना" नील०ता० । ७अदर्शनप्राप्ते रव्यादिग्रहे त्रि० सूर्य्यादिग्रहाणामपि प्राग्युक्तरीत्या स्वाधिष्ठितराश्यपेक्षया सप्तमराश्युदयेऽस्तत्वम् यथोक्तं सि०शि० । "निजनिजोदयलग्नसमुद्गमे समुदयोऽपि भवेद्गगनसदाम् । भवति चास्तविलग्नसमुद्गमे प्रतिदिनेऽस्तमयः प्रवहक्रमात्" निशोष्टलग्नादुदयास्तलग्ने न्यूनाधिके यस्य खगः स दृश्यः । दिनेऽपि चन्द्रोरविसन्निधानात् नास्तंगतश्चेत् सति दर्शने भा" । "नक्षत्राणामभ्युदयास्तज्ञापनमपि तत्रैव "दृक्कर्मणा पलभवेन तु केवलेन भानां मुनेर्भृगरिपोरुदयास्तलग्ने । कृत्वा तयोरुदयलग्नमिनं प्रकल्प्य लग्नं ततो निजनिजे पठितेष्टकाले" । यत् स्वादसावुदयभानुरथास्तलग्नाद्व्यस्तं विभार्धमपि लग्नकमस्तसूर्यः । इष्टोनषष्टि ६० घटिकास्वथ वास्तलग्नाल्लग्नं क्रमेण भदलोनितमस्तसूर्यः । स्वादुद्गमो निजनिजोदयभानुतुल्ये सूर्येऽस्तभास्करसमेऽस्तमयश्च भानाम् । अत्राधिकोनकालिका रविभुक्तिभक्ता यातैष्यवासरमितिश्च तदन्तरे स्यात् । यस्योदयार्कादधिकोऽस्तभानुः प्रजायते सौम्यशरातिदैर्घ्यात् । तिग्मांशुसान्निध्यवशेन नास्ति धिष्ण्यस्य तस्यास्तमयः कथञ्चित्" । "भानामगस्त्यस्य लुब्धकस्य च पूर्ववदुदयास्तलग्ने साध्ये परन्तु केवलेन पलभवेन दृक्कर्मणा । ध्रुवस्य कृतायनदृक्कर्मकत्वात् पुनरायनं दृक्कर्म न कर्त्तव्यमित्यर्थः । तत्रोदयलग्नमर्कं प्रकल्प्य लग्नं साध्यम् । तच्च स्वकीये पठितेष्टकाले । एवं यल्लग्नं सिध्यति स उदयार्को ज्ञातव्यः । अथ यदस्तलग्नमानीतं तच्चार्कं प्रकल्प्य निजनिजेष्टकाले विलोमं लग्नं साध्यम् । तद्राशिषट्कोनमस्तसूर्यश्च"